International Journal of Advanced Research and Development
ISSN: 2455-4030, Impact Factor: RJIF 5.24
www.advancedjournal.com
Volume 2; Issue 3; May 2017; Page No. 190-192

# ब्राह्मणसाहित्यम्

**माया यादव**

प्रवक्ता संसकृत, रा. व. मा. वि. नाहड़, रेवाड़ी, हरियाणा, भारत।

**प्रस्तावना**

भारतवर्षे हिन्दुधर्मस्य ये सहस्त्रशो नीतिनियमाः, विधिव्यवस्थादयाश्च सन्ति। तेषां निरूपकाः आदिग्रन्थाः ब्राह्मणसाहित्यान्तर्गताः सन्ति। ब्राह्मणानि हिन्दूधर्मस्य प्रधानस्त्रोतांसि सन्ति। धर्मस्य अतिप्राचीनं व्याख्यानमत्र प्राप्यते। ब्राह्मणसाहित्यं वेदापरपर्यायमस्ति। "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति आपस्तम्बसूत्रानुसारेण मन्त्र इव ब्राह्मणापि वेदनामधेयम्। निघन्टुनिरूक्तारौ वेद इव ब्राह्मणं मन्यते।

मनुनाऽपि मन्त्रेण सह ब्राह्मणमपि वेद एव कथ्यते। ब्राह्मणग्रन्थेषु सांसारिकक्रियाकलापानां वर्णनमस्ति। तथा च आध्यात्मिकविषयस्य गम्भीरं चिन्तनमपि अस्ति। ब्राह्मणग्रन्थानां प्रधानविषयः यज्ञानां प्रतिपादनं तथा च तेषां विधीनां व्याख्यानं वर्तते- "यज्ञो वै श्रेष्ठतमं कर्म"।

"ब्राह्मण" शब्दस्य निष्पत्तिः "ब्रह्म" शब्देन तध्दितार्थक "अण" प्रत्ययं संयुज्य भवति। ब्राह्मणो वेदस्य इमानि व्याख्यानानि ब्राह्मणानि। मन्त्रो मननात्। ब्राह्मणमभिधानात् । अर्थात ब्राह्मणग्रन्थेषु ब्राह्मणः वेदस्य वा व्यावहारिकं कथनं वर्तते।

ब्राह्मणशब्दस्यार्थः यज्ञोऽपि भवति। अतः ब्राह्मणग्रन्थानां सम्बन्धः ब्राह्मणा यज्ञेन भवति। स्वरूपदृष्टया ब्राह्मणग्रन्थानां अतिप्रमुखं वैशिष्टयं दव्यमस्ति-

1. कर्मकाण्डमाध्यमेन वेदमन्त्राणां व्याख्या अस्ति।
2. अत्र पाश्चात्यविदुषः गद्यात्मकानि सन्ति ब्राह्मणानि।

ब्राह्मणेषु मैक्डोनलमहोदयस्य उक्तिः उध्दरणयोग्या-

संग्रहदृष्टया "ब्राह्मण" शब्दस्यार्थ भवति पुरोहितानां यज्ञसम्बन्धिकथनानां वादविवादानां च संग्रह।

अत एव संक्षेपेण वक्तुं शक्यते यत् ब्राह्मणं यज्ञविज्ञानस्य मीमांसां कर्मकाण्डस्य च बहुविधां सरणिं प्रस्तौति।

ब्राह्मणग्रन्थाः यज्ञानां वैज्ञानिकीं, आधिभौतिकीं तथा च आध्यात्मिकी मीमांसां प्रस्तुतीकुर्वन्तः कर्मकाण्डविषयकाः विश्र्वकोशाः सन्ति। ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः।

**"नैरूक्त्यं वेदमन्त्रस्य विनियोगः प्रयोजनम्।**
**प्रतिष्ठानं विधिश्र्चैव ब्राह्मणं तदिहोच्यते।।"**

इति वाचस्पतिमिश्रः।

ब्राह्मणानां द्रष्टा आचार्य इत्युच्यते। आश्र्वलायनगृह्यसूत्रे तेषामाचार्याणां गणत्रयस्योल्लेखः प्राप्यते-

1. माणडूकेयगणः
2. शाड्ख्यायनगणः
3. आश्र्वलायनगणः।

ब्राह्मणाचार्याणां नामानि सन्ति-कहोलः, कौषीतकः, महाकौषीतकः, भारद्वाजः, पैड्ग्यः, महापैड्ग्यः, सुयज्ञः, शाड्ख्यायनः, ऐतेरयः, वाष्कलः, शाकलः, गार्ग्यः, सुजातवक्रः, औदवाहिः, सौजामिः, शौनकः, आश्र्वलायनः च। चतुर्णां वेदानां पृथक- पृथक ब्राह्मणानि आसन्। प्रतिवेदम् उपलब्धब्राह्मणानि अधोलिखितानि सन्ति-

**ऋग्वेदस्य-**

1. ऐतेरयब्राह्मण्
2. शाड्खायनम् अथवा कौषीतकिब्राह्मण्

**यजुर्वेदस्य-**

3. तैत्तिरीयब्राह्मणम्- (कृष्णयजुर्वेदस्य)
4. शतपथब्राह्मणम् - (शुक्लयजुर्वेदस्य)

**सामवेदस्य-**

5. ताण्डयम् अथवा पञ्चविशब्राह्मणं
6. सामविधानब्राह्मणम्
7. आर्षेयब्राह्मणम्
8. दैवतब्राह्मणम्
9. उपनिषद्ब्राह्मणं (मन्त्रब्राह्मणं, छान्दोग्योपनिषद्ब्राह्मणम्)
10. वंशब्राह्मणम्
11. संहितोपनिषद्ब्राह्मणम्
12. जैमिनीयब्राह्मणम्।

**अथर्ववेदस्य-**

13. गोपथाब्राह्मणम्।

चतुर्णां वेदानामाहत्य त्रयोदश ब्राह्मणानि वर्तन्तो। तेषां संक्षिप्तः परिचयः अत्र क्रमशः प्रस्तूयते-

**1. ऐतेरयब्राह्मणम्-**

ऋग्वेदीयब्राह्मणेषु सर्वप्रथमं उल्लेखनीयः ग्रन्थः ऐतेरयब्राह्मणम् एव अस्ति। अस्य रचियता ऋषिः महीदासः ऐतेरयः मन्यते। अस्मिन्ग्रन्थे अष्टौ पञ्चिकाः सन्ति। प्रतिञ्चिकायां पञ्चाध्यायाः सन्ति। सर्वे मिलित्वा चत्वारिंशदध्यायाः सन्ति। अस्मिनग्रन्थे पञ्चाशीत्यधिकव्दिशतं कण्डिकाः सन्ति। अस्मिन् ग्रन्थे होतृनाम्नः ऋत्विजः विशिष्टकार्यकलापानां विशेषविवरणं वर्तते। इदं सोमयागस्य बहुविधस्वरूपस्य तथा तस्य इतिहासस्य प्रदर्शने अतीव गौरवमावहति।

ऐतेरयब्राह्मणस्य तिस्त्रः व्याख्याः समुपलभ्यन्ते।

1) सायणकृतभाष्यम्
2) षड्गुरूशिष्यरचिता "सुखप्रदा" नाम्नी लघुव्याख्या।
3) गोविन्दस्वामिनः अप्रकाशिता व्याख्या।

**2. शाड्खायनब्राह्मणम्-**

शाड्खायने किञ्च कौषीतकीब्राह्मणे त्रिंशत् अध्यायाः खण्डेषु विभक्ता सन्ति। खण्डानां सङ्ख्याः – 226 अस्ति। खण्डाभ्यन्तरे दीर्घगद्यमस्ति। अस्मिन् ग्रन्थे रूद्रस्य विशिष्टा महिमा वर्णिता अस्ति। सः देवेषु ज्येष्ठः श्रेष्ठः च अमन्यत।

**"रुद्रो वै ज्येष्ठश्च श्रेष्ठश्च देवानाम्।" (25)**

**3. तैत्तिरीयब्राह्मणम्-**

तैत्तिरीयब्राह्मणं कृष्णयजुर्वेदीयशाखायाःउपलब्धब्राह्मणग्रन्थोऽस्ति। अस्य पाठः स्वरयुक्तः लभ्यते। फलतः इदं नितान्तं प्राचीनं प्रतीयते। अयं ग्रन्थः त्रिषु काण्डेषु विभक्तः। प्रथम- दि्वतीयकाण्डयोः अष्टावष्टावध्यायाः सन्ति। तथा तृतीयकाण्डे दव्दशाध्यायाः सन्ति। अस्य अवान्तरखण्डः "अनुवाक"
इति नाम्ना ख्यातोऽस्ति।

तैत्तिरीयब्राह्मणे अनेका ऋचः ऋग्वेदात् समुद्धृताः सन्ति। अत्र ब्राह्मतत्वस्य संड्केतः अविस्मरणीयशब्देषु कृतः अस्ति । नास्दीयसूक्तस्य ( ऋ.-10/129) मन्त्राणां विनियोगः सामान्ये उपहोमकर्मणि अस्ति। अस्मिन् ब्राह्मणे सामवेदः समस्तानां वेदानां शीर्षस्थानीयो मन्यते "मूर्तिस्तथा वैश्यस्य उत्पत्तिः ऋग्वेदात्, गतिस्तथा क्षत्रियस्य उत्पत्तिः यजुर्वेदात् ज्योतिषस्तथा ब्राह्मणस्य उत्पत्तिः सामवेदात्, इति उक्त्वा सामवेदस्य श्रेष्ठत्वम् अनेन ब्राह्मणेन स्थापितम्। पुराणेषु उल्लिखितानां अवतारकथानां बीजम् अत्र समुपलब्धं भवति। वाराहवतारस्य स्पष्टतः संड्केत ग्रन्थेऽस्मिन् प्राप्यते"।

**4. शतपथब्राह्मणम्** –

ब्राह्मणग्रन्थेषु शतपथब्राह्मणं सर्वाधिकमहत्वपूर्णं विपुलकायं ब्राह्मणमस्ति। इदं यागानुष्ठानस्य सर्वोत्तमः प्रतिपादकः ग्रन्थः। यजुर्वेदस्य् दव्योः (काण्वमान्धयन्दिन) शाखयोः शतपथब्राह्मणमुपलब्धमस्ति। माध्यन्दिनशतपथब्राह्मणे काण्डानां संड्ख्या 14 कथिता। अत्र शतमध्यायाः विद्यन्ते। प्रपाठकानां संड्ख्या 68, ब्राह्मणानां संड्ख्या 438 तथा कण्डिकानां संड्ख्या 7624 वर्तते। काण्वशतपथे 17 काण्डानि, 108 अध्यायाः, 435 ब्राह्मणानि, 6806 कण्डिकाश्च सन्ति। शतपथब्राह्मणस्य सम्बन्धः शुक्लयजुर्वेदेन सह अस्ति।

**5. ताण्डयब्राह्मणम्-**

इदं सामवेदस्य प्रधानं ब्राह्मणमस्ति। ताण्डिशाखातः इदं सम्बध्दम्। अस्मिन् ब्राह्मणे पञ्चविंशतिः अध्यायाः सन्ति, तेन पञ्चविंशनाम्ना तथा विशालकायत्वेन महाब्राह्मणनाम्ना ख्यातमस्ति एतद्। इदं ब्राह्मणं यागानुष्ठानेषु उग्दातृणां तत्कार्याणाञ्च विपुलमीमांसां करोति। अस्मिन् ब्राह्मणे यज्ञीयप्रधानविषयमाधारीकृत्य विभिन्नानां ब्रह्मवादीनां मतस्योल्लेखः समुपलब्धो भवति। विभिन्नाचार्याणां मतानां खण्डनं कृत्वा स्वाभीष्टस्य स्थापनमपि क्रियते अनेन ब्राह्मणेन। ताण्डयब्राह्मणे व्रात्ययज्ञस्य वर्णनमेकः महत्वपूर्णः विषयः अस्ति। ताण्डयब्राह्मणस्य सप्तदशाध्यायस्य प्रथमखण्डे व्रात्यानां वेषभूषायाः आचरविचारस्य च विषये बहुमूल्यपदार्थानां निर्देशो मिलति। अयं निर्देशः धार्मिकदृष्टया विशेषरूपेण महत्वमादधाति। प्रवासी - आचारविहीनः आर्यः एव व्रात्यनाम्नऽभिज्ञायते। अस्य व्रात्यस्य चत्वारः भेदाः सायणभाष्ये मिलन्ति। एतेषां दोषमुक्तये विभिन्नयज्ञानां विधानं ताण्डयब्राह्मणे दृश्यते। ब्राह्मणयुगीनभौगोलिकज्ञानाय अपि अस्य ब्राह्मणस्य प्रकृष्टा उपयोगिता अस्ति। अस्य ब्राह्मणस्य भौगोलिकक्षेत्रं कुरुक्षेत्रं तथा सरस्वत्याः मण्डलमस्ति। इदं क्षेत्रं स्वर्गं इव मन्यते। विनशनः, प्लक्ष, प्रास्त्रवणः, यमुना इत्यादीनां भौगोलिकस्थानानां निर्देशः ताण्डयब्राह्मणे समुपलभ्यते।

**6. सामविधानब्राह्मण-**

इदं सामवेदस्य अन्यतमं ब्राह्मणमस्ति। अस्मिन् ब्राह्मणे अभिचाराय, ग्रामात् निष्कासनाय, शत्रूणां विनाशाय, धनार्जनाय, नानाविधानानाम् उपद्रवानां शमनाय च सामगामेन सह कतिपयस्य विशिष्टानुष्ठानस्य विधानमस्ति। अस्य ब्राह्मणस्य वर्णनशैली न पुनरुक्तिप्रधाना न चात्यन्तसंक्षिप्ता अस्ति। अस्मिन् ब्राह्मणे प्रकरणत्रयमस्ति।

प्रथमे प्रकरणे कृच्छ्र - अतिकृच्छ्रादीनां स्मृतिषु बहुशः वर्णितव्रतानां वर्णनं भवति। पुराणेषु वर्णितव्रतानां मूलमपि अस्मिन् ब्राह्मणे समुपलब्धं भवति, यथा-जले स्थित्वा कस्यापि विशिष्टमन्त्रस्य जपेन विशिष्टफलस्य प्राप्तिर्भवति। अस्मिन् ब्राह्मणे काम्यप्रयोगाणां तथा विविधप्रायश्चित्तानां विधानमपि वृध्दिं प्राप। अयं ब्राह्मणग्रन्थः धर्मसूत्राणां पूर्वपीठिका अस्ति।

**7. आर्षेयब्राह्मणम्-**

इदं ब्राह्मणं सामवेदस्य अनुक्रमण्याः कार्यं करोति। अयं ग्रन्थः त्रिषु प्रपाठकेषु तथा दव्यशीतिखण्डेषु विभक्तोऽस्ति। इदं ब्राह्मणं सामगायनस्य प्रथमप्रचारकाणां ऋषीणां वर्णनं करोति। तेन इदमैतिहासिकदृष्टया महत्वपूर्णमस्ति तथा च सामगायनस्य वैज्ञानिकानुशीलने महद् उपादेयमस्ति।

**8. दैवत (दैवताध्याय) ब्राह्मणम्** –

सामवेदीयब्राह्मणेषु इदं लध्वाकारमस्ति। अस्मिन ग्रन्थे खण्डत्रयमस्ति। प्रथमखण्डे देवतानां वर्णनमस्ति। दि्वतीयखण्डे छन्दसां देवताः तथा तेषां विशेषवर्णनमस्ति। तृतीयखण्डे छन्दसां निरुक्तयः सन्ति। अयं खण्डः भाषाशास्त्रदृष्टया अतीव महत्वपूर्णः अस्ति। अत्र छन्दसां नाम्नां निर्वचनमतीव प्रामाणिकरीत्या सम्पादितमस्ति। गायत्रीछन्दसां नाम्नः अर्थोऽस्ति-स्तुत्यर्थक "गै" धातोः निष्पन्नं देवतानां प्रशंसकात् तथा वेदसमुदायस्य गानकर्तुः ब्राह्मणात् समुत्पन्नं छन्दः। अनेन प्रकारेण अन्येषां छन्दसामपि निर्वचनं समुपलभ्ये।

**9. उपनिषदब्राह्मणम्**

इदं ब्राह्मणं प्रपाठकेषु विभक्तमस्ति। अस्मिन् द्वौ ग्रन्थौ सम्मिलितौ स्तः- मन्त्रब्राह्मणं तथा छान्दोग्योपनिषदब्राह्मण्।

1) मन्त्रब्राह्मण्- अस्यापरं नाम छान्दोग्योब्राह्मणमस्ति। अस्मिन् द्वौ प्रपाठकौ स्तः। प्रतिप्रपाठकमष्टौ खण्डानि सन्ति। इदं ब्राह्मणं गृह्यसंस्कारेषु प्रयुक्तमन्त्राणां एकं सुष्ठु-संग्रहमस्ति।
2) छान्दोग्योपनिषदब्राह्मण्- -उपनिषदब्राह्मणस्य अन्तिमाः अष्टप्रपाठकाः एव छान्दोग्योब्राह्मणमस्ति। प्राथमिकेषु पञ्च प्रपाठकेषु ब्राह्मणलक्षणं तदग्रे त्रिषु प्रपाठकेषु उपनिषल्लक्षणं चाधिकतया संड्घटते। अस्य अनेकानि संस्करणानि भाषान्तरेषु बभूवः।

**10. वंशब्राह्मणम्**

इदं ब्राह्मणं स्वरूपदृष्टया लघ्वाकारमस्ति। अस्मिन् ग्रन्थे खण्डत्रयमस्ति। अस्मिन् ब्राह्मणे सामवेदीयाचार्याणां वंशपरम्परा संड्कलिता अस्ति। प्राचीनानां ऋषीणां परिचायणे इदं ब्राह्मणमतीव उपकारकं भवति। 1873 ख्रीष्टाब्दे कोलकातानगरीतः उषानाम्नि पत्रिकायामिदं ब्राह्मणं सत्यव्रतसामाश्रमीमहोदयेन प्रकाशितम्। तदनन्तरं 1965 ख्रीष्टाब्दे त्रिरुपतिस्थ – केन्द्रीयसंस्कृतविद्यापीठेन अयं ब्राह्मणमग्रन्थः प्रकाशितः।

**11. जैमिनीयब्राह्मणम्**

इदं ब्राह्मणं सम्पूर्णरूपेण अद्यावधि न उपलब्धम्। शतपथब्राह्मण् इव जैमिनीयब्राह्मणं विपुलकायमासीत्। अयं ग्रन्थः गायत्र्युपनिषद् इति नाम्ना प्रख्यातोऽस्ति।

अस्य ग्रन्थस्य संपादनं डा0 ओर्टलमहोदयेनःअमेरिकातः कृतम। डा0 कैलेणडमहोदयः अस्य विशेषांशान् जर्मनभाषायाम् अनूद्य प्रकाशनमकरोत्। डा0 रघुवीरः अस्य महत्वपूर्णस्य ब्राह्मणस्य प्रकाशनं ख्रीष्टाब्दस्य 1954 ईसवीये नागपुरे अकरोत्।

**12. संहितोपनिषद् ब्राह्मणंम्**

इदं ब्राह्मणं सामागायनस्य विवरणप्रदाने स्वकीयं गौरवम् आवहति। संहितायाः उपनिषद् अर्थात् संहितायाः रहस्यप्रतिपादकम् इदं ब्राह्मणं सामवेदीयब्राह्मणेषु वैशिष्टयं स्थापयति। अस्मिन् ब्राह्मणे पञ्च खण्डानि सन्ति। प्रतिखण्डं सूत्रेषु विभक्तमस्ति। प्रथमखण्डे त्रिविधगानस्य संहितायाः स्वरुपस्य फलस्य च विवरणमस्ति।

संहिता त्रिविधा-(क) देवहूसंहिता, (ख)वाक्शबहू संहिताः, (ग)अमित्रहूसंहिता इति। तासु प्रथमसंहिता कल्याणकारिणी अस्ति दिव्तीयतृतीय- खण्डयोः गानसंहितायाः विधि-स्तोभ-अनुलोम-प्रतिलोम-स्वरादीनां व्यापकं प्रतिपादनमस्ति।

**13. गोपथब्राह्मणम्**

अथर्ववेदस्य एकमात्रं ब्राह्मणं गोपथब्राह्मणमस्ति। अस्यव्दौ भागौ स्तः।

1. पूर्वगोपथब्राह्मण्।
2. उत्तरगोपथब्राह्मण्।

प्रथमे पञ्च प्रपाठकाः दिव्तीये षट् प्रपाठकाश्च सन्ति। प्रपाठकानां विभाजनं कण्डिकासु अभवत्। कण्डिकानां संड्ख्या 258 वर्तते। ब्राह्मणसाहित्ये अयं ग्रंथः उत्तरकालिकी रचना मन्यते। अस्मिन् ब्राह्मणे अर्थववेदस्य महिमा स्वभावतः गीयते। पूर्वगोपथब्राह्मणस्य प्रथमप्रपाठके ओंकारस्य तथा गायत्र्याः महिम्नः सुष्ठु वर्णनमस्ति। दिव्तीयप्रपाठके ब्रह्मचारिणः नियमानां विशिष्टं वर्णनमस्ति। तृतीयप्रपाठके यज्ञस्य, चतुर्णाम् ऋत्विजां कार्यकलापस्य च वर्णनमस्ति। चतुर्थप्रपाठके ऋत्विजां दीक्षायाः विशिष्टं वर्णनमस्ति। पञ्चमप्रपाठके प्रथमतः संवत्सरसत्रस्य वर्णनमस्ति। तदनन्तरम् – अश्वमेध- पुरुषमेध- अग्निष्टोमादियज्ञानामपि विवरणमस्ति।

उत्तरगोपथब्राह्मणस्य विषयवर्णनं न तावदेव सुव्यवस्थितमस्ति। तथापि अयं भागः बहुविधानां यज्ञानां तथा तत्सम्बध्दानामाख्यायिकानाम् उल्लेखेन विद्वद्दश्यः पूर्वोपेक्षया अधिकं रोचते। गोपथब्राह्मणस्य रचयिता गोपथऋषि अस्ति। अस्मिन् ग्रन्थे कतिपयानाम् अभिनवविचाराणां संड्कलनमस्ति। अस्य अन्तिमखण्डे अथर्वणः विपुला प्रशंसा मिलति। वेदमन्त्रस्य उच्चरणात् पूर्वम ओंकारस्य उच्चरणां कर्त्तव्यम्। भाषाशास्त्रदृष्टया गोपथब्राह्मणस्य संड्केताःमहत्वपूर्णाः सन्ति।